## मातृष्वसुश्च। (१३४/११४०)

पितृष्वसुः इत्ये[1]तदपेक्षते। पितृष्वसुर्यदुक्तं तन् मातृष्वसुरपि भवति, छण्प्रत्ययो ढकि लोपश्च। मातृष्वस्रीयः। मातृष्वसेयः[2]॥

## चतुष्पाद्भ्यो ढञ्। (१३५/११४१)

चतुष्पादभिधायिनीभ्यः प्रकृतिभ्योऽपत्ये ढञ्प्रत्ययो भवति। अणादीनामपवादः। कामण्डलेयः। शौन्तिबाहेयः। जाम्बेयः॥

## गृष्ट्यादिभ्यश्च। (१३६/११४३)

गृष्टयादिभ्यः शब्देभ्यो[3]ऽपत्ये ढञ् प्रत्ययो भवति। अणादीनामपवादः। गार्ष्टेयः। [4]हार्ष्टेयः। गृष्टिशब्दो यश्चतुष्पाद्वचनः, ततः पूर्वेणैव [5]सिद्धः। अचतुष्पादर्थं वचनम्।

गृष्टि। हृष्टि। हलि। बलि। विश्रि। कुद्रि। अजबस्ति। मित्रयु[6]॥

## राजश्वशुराद्यत्। (१३७/११५३)

[7]राजन्श्वशुरशब्दाभ्यामपत्ये यत् प्रत्ययो भवति। यथाक्रममणिञोरपवादः। राजन्यः। श्वशुर्यः।

[३९२] राज्ञोऽपत्ये जातिग्रहणम्। (म. भा. २.२५९)

राजन्यो भवति क्षत्रियश्चेत्। [8]राजनोऽन्यः॥

## क्षत्राद् घः। (१३८/११६१)

क्षत्रशब्दादपत्ये घः प्रत्ययो भवति। क्षत्रियः। अयमपि जातिशब्द एव। क्षात्रिरन्यः॥

## कुलात् खः। (१३९/११६२)

उत्तरसूत्रे पूर्वप्रतिषेधादिह तदन्तः केवलश्च [9]दृश्यते। कुलशब्दान्तात् प्रातिपदिकात् केवलाच्च अपत्ये खः प्रत्ययो भवति। आढ्यकुलीनः[10]। [11]श्रोत्रियकुलीनः। कुलीनः॥

## अपूर्वपदादन्यतरस्यां यड्ढकञौ। (१४०/११६३)

[12]कुलादित्येव। अविद्यमानं पूर्वपदं यस्य तदपूर्वपदम्। समाससम्बन्धिपूर्वपदस्याभावेन कुलशब्दो विशेष्यते। अपूर्वपदात्[13]कुलशब्दात् अन्यतरस्यां यत् ढकञ्[14]इत्येतौ प्रत्ययौ भवतः। ताभ्यां मुक्ते खोऽपि भवति। कुल्यः, कौलेयकः, कुलीनः। पदग्रहणं किम्? [15]बहुच्पूर्वादपि यथा स्यात्। बहुकुल्यः, [16]बाहुकुलेयकः, बहुकुलीनः॥

---

1. एतन्नास्ति फ. 2. मातृपितृभ्यः स्वसरि षत्वम् इत्यधिकम् फ. 3. अपत्ये नास्ति ड. 4. भार्ष्टेयः फ. 5. सिद्धम् फ. 6. फलि अलि दृष्टि इत्यधिकम् ग. 7. राजश्वशुर° फ. 8. जातिग्रहणाच्छूद्रादौ उत्पन्नः राजनः ग. 9. गृह्यते ग. फ. 10. राजकुलीनः ब्राह्मणकुलीनः इत्यधिकम् क. 11. क्षत्रियकुलीनः फ. 12. वाक्यमिदं नास्ति फ. 13. प्रातिपदिकात् इत्यधिकम् फ. 14. इत्येतौ नास्ति फ. 15. बहुपूर्वात् फ. 16. बहुकुलेयकः फ.